# अथ पारायणक्रमस्सोपपत्तिकः ॥

परस्यब्रह्मणस्साक्षात् स्थानं यस्मादुदीरितम् ॥ तेनपारायणं नाम श्रोतृणा
म्मुक्तिदायकम् ॥ वक्तुस्सर्वार्थनिष्पत्तिप्रदं प्रोक्तम्महर्षिभिः ॥ तत्क्रमस्स्कान्दे ॥
एकाहत्र्यहपञ्चाहसप्ताहामासिकस्तथा ॥ द्विमासिको वार्षिकश्च कालः पारा
यणे विधौ ॥ वेदत्रयीरमायुक्ता पारायणपरायतः ॥ सर्वार्थसिद्धिर्वक्तृणां श्री
मद्भागवतात्सदा ॥ सप्ताहनिरतो ब्रह्मा विष्णुर्मासिकतत्परः ॥ द्विमासिकपरा
लक्ष्मीराब्दिकानुरतः शिवः ॥ अनेन क्रमयोगेन पारायणविधौपरम् ॥ महत्त्वम्मन
सि ज्ञात्वा सरयूशरणस्सुधीः ॥ सरणिंशुभदामाह तस्य श्रीधरसम्मताम् ॥ अन्य
स्मात्कारणाच्छ्रोतृवक्तृणां हितकाम्यया ॥ हिरण्याक्षवधं यावत्प्रथमेऽहनिकीर्त्तये
त् ॥ भरतस्यापि चरितं द्वितीयेऽथ तृतीयके ॥ सुधामन्थनपर्य्यन्तं यत्र कूर्मोभ
वद्धरिः ॥ चतुर्थे दिवसे विद्वान् दशमे हरिजन्म वै ॥ पञ्चमेऽहनि वक्तव्यं रु-
क्मिण्याहरणावधि ॥ षष्ठएकादशे वाच्यमुद्धवागमनावधि ॥ सप्तमे द्वादशस्क
न्धमुक्त्वा धीरः परंव्रजेत् ॥ मध्ये तु विरमेन्नैव ह्यध्यायान्तं समापयेत् ॥ इष्टा
चारानुमतन्धर्ममवलम्ब्य लोके श्रोतृसम्बोधनात्मकञ्च धर्ममवलम्ब्य वक्तृसु
खाय पारायणसरणिर्मयाकृता ॥ हरिपदमतिदायकोतिधन्यो परमयशःक
थनो विशुद्धधर्म्मा ॥ भगवति शुभधीयुजामजस्रं सुहितकरोहि सताम्मुदेस्तु
मेनुबन्धः ॥ इति शमस्तु ॥

सद्विद्यावाप्तकीर्त्तिर्विमलमतिरभूद्भूमिपार्च्यस्त्रिवेदी श्रीमंसारामनामा विबुध
गुरुसमाराधकश्श्रौतधर्म्मा ॥ यस्संसेव्य स्वदैवं ह्यलभत सुमतिष्ठाकुरादिप्रसा
दम्पुत्रञ्चात्मानुरूपन्निजजनसुखदं सज्जनैर्बद्धभावम् १ खुदेखेरपुरे सोऽयं
श्रीठाकुरप्रसादकः ॥ सूदावनिनरेशाप्तसपर्य्योन्यवसन् मुदा २ तस्यज्येष्ठा
प्रियासाध्वी पुत्रद्वयमजीजनत् ॥ जनकाकृतिसौशील्यगुणाढ्यं कुलवर्द्धकम् ३
श्रीसरयूप्रसादेन जातोहं निजमातरि ॥ तन्नामावरजोमेऽभूद्गणेशादिप्रसादकः ४
पितुरेवाधिगम्याऽऽशुविद्याराशिमतोगृहात् ॥ भुक्तभोगस्सुतद्वन्द्वे न्यस्तभारो
विनिर्गतः ५ श्रीरामं कनकागारविहारिजनकामदम् ॥ अध्ययोध्यश्चिन्तयन्मे म
नश्शान्तं व्यजायत ६ तत्रेष्टदेवसन्नुन्ना मतिर्मेतद्गुणार्णवम् ॥ तरितुश्चोत्सुका
तोऽद्य प्रणम्य सशुकं गुरुम् ७ श्रीपारायणसरणिं मुनिगणयुक्तोनविंशाब्दे ॥ व्य
दधाम्बुधेस्वतुष्टयै मार्गशुक्ले च सप्तम्याम् ८ श्रीमत्तातपदाब्जसेवनरतो रामेश्व
रोस्यात्मजः पित्रासंरचितांशुभाञ्चसरणिम्पारायणस्याद्भुताम् ॥ श्रीयुग्भार्ग
वकं प्रयागसहितं नारायणंप्राप्यतां वेदेष्वङ्कधराब्दकेसितासिताऽष्टम्याञ्चमस्या
श्चकृत् ९ पितृप्रणीतमुद्रणे मदीयबुद्धिविभ्रमाद्यदस्तुकुत्रचिच्च्युतंतदार्य्यका
स्स्वगौरवात् ॥ विशुद्धयात्मनोधिया विशोध्यप्रेमपूर्वकम्पठन्तु चेत्सदा भवेदनु
ग्रहस्सताम्मयि १० ॥





UNIVERSITÄTS-
BIBLIOTHEK
HEIDELBERG
http://digi.ub.uni-heidelberg.de/diglit/prasada1900/0067
© Universitätsbibliothek Heidelberg
gefördert durch die
DFG